International Journal of Sanskrit Research 2022; 8(4): 30-32

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 30-32
© 2022 IJSR
www.anantaajournal.com
Received: 02-03-2022
Accepted: 10-06-2022

**कमलाकान्तमिस्त्री**
शोधछात्र, न्यायविभाग, श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

**Corresponding Author:**
**कमलाकान्तमिस्त्री**
शोधछात्र, न्यायविभाग, श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

# न्यायनये निःश्रेयसप्राप्तौ संशयप्रयोजनम्

**कमलाकान्तमिस्त्री**

**प्रस्तावना**

(लेखकेन प्रस्तुतेऽस्मिन् शोधपत्रे न्यायदर्शने निःश्रेयलाभे संशयनामकस्य पदार्थस्य कीदृशं प्रयोजनमस्ति तत्स्पष्टं प्रदर्शितम्।)

''न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।''[1] ज्ञानसदृशं पवित्रं वस्तु नास्ति किमपि इह जगति। दुःखस्य निवृत्तिः सुखस्य च प्राप्तिः मनुष्यस्य प्रधानमुद्देश्यम्। तदर्थम् आरब्धं तत्त्वज्ञानस्य अन्वेषणम्। भारतीयपरम्परया यच्छास्त्रं यथार्थतत्त्वज्ञानाय सहायतां करोति तच्छास्त्रं दर्शनशास्त्रमिति। अतः प्रसिद्धं- ''दृश्यते यथार्थतत्त्वमनेन इति दर्शनम्।''

भारतीयदार्शनिकाः वैदिककालात् प्रज्ञाभिः ज्ञानान्वेषणं कुर्वन्तः सन्ति। भारतीयदार्शनिकपरम्परायां भारतीयदर्शनम् आस्तिक-नास्तिकभेदेन द्विविधम्। पाणिनीयसूत्रे दृश्यते- ''अस्ति नास्ति दिष्टं मतिः।''[2] ये वेदप्रामाण्यमङ्गीकुर्वन्ति ते आस्तिकाः, ये खलु वेदप्रामाण्यं नाङ्गीकुर्वन्ति ते नास्तिकाः। तत्र आस्तिकदर्शनानि षट् सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसाश्चेति। नास्तिकदर्शनानि तु त्रीणि चार्वाक-बौद्ध-जैनाश्चेति। तत्र आस्तिकदर्शनेषु न्यायदर्शनं भवति सर्वशास्त्रप्रदीपस्वरूपम्।

''प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता।।''[3]

धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु मोक्षः एव परमपुरुषार्थः इति सर्वैः दार्शनिकैः स्वीकृतम्। मोक्षस्य अर्थः मुक्तिरिति। सा मुक्तिस्तु आत्मज्ञानेनैव भवति। यथोक्तं बृहदारण्यकोपनिषदि- ''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या वा विज्ञानेनेदं सर्वं विदितम्''[4] इति।

भारतीयास्तिकदर्शने विभिन्नाः सम्प्रदायाः आत्ममुक्तये पथनिर्देशं कुर्वन्ति। तत्र न्यायसूत्रकारेण महर्षिणा गौतमेनापि षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसः प्राप्यते इति स्वीकृतम्। तद्यथा- ''प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः''[5] इति। तत्त्वस्य ज्ञानं तत्त्वज्ञानम्। तस्य भाव इत्यर्थे तत्त्वपदं निष्पद्यते। तत्र तच्छब्देन यथाक्रमेण सत्पदार्थः असत्पदार्थश्चेति प्रतिपाद्येते। सतः सज्ज्ञानम् असतश्च असज्ज्ञानमेव तत्त्वमिति। तदुक्तं भाष्यकारेण- ''किं पुनस्तत्त्वम्? सतश्च सद्भावोऽसतश्चासद्भावः''[6] इति। निश्चितं श्रेयो निःश्रेयसम् इति निःश्रेयसस्य व्युत्पत्तिरिति। अतः मुक्तिरेव भवति निःश्रेयसम्। अभीष्टार्थेऽपि निःश्रेयसस्य प्रयोगो दृश्यते। तदुक्तं महाभारते-

''क्वचित्सहस्रैर्मुर्खाणामेकं क्रीणासि पण्डितम्।
पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं परम्।।''[7]

दृष्टादृष्टभेदेन निःश्रेयसं द्विविधिम्। तत्र मोक्षरूपम् अदृष्टनिःश्रेयसं न्यायविद्यायाः मुख्यप्रयोजनम्। पुनश्च विद्यासाध्यं दृष्टनिःश्रेयसं न्यायविद्यायाः गौणप्रयोजनमिति। यथा-दण्डनीतिशास्त्रे देशकालपात्रानुसारेण सामदानादिप्रयोगज्ञानमेव तत्त्वज्ञानं, राज्यादिलाभस्तु

---

[1] श्रीमद्भगवद्गीता 4/38
[2] अष्टाध्यायी 4/4/60
[3] वात्स्यायनभाष्यम्।
[4] बृहदारण्यकोपनिषद् 2/8/5
[5] न्यायसूत्रम् 1/1/1
[6] वात्स्यायनभाष्यम्।
[7] महाभारतम्, सभापर्व, 5/35

निःश्रेयसम्। दर्शनजगति निःश्रेयसस्य तु मोक्षः एकः प्रधानार्थः। तन्निःश्रेयसं तत्त्वज्ञानादेव प्राप्यते। तत्र आत्मादिप्रमेयपदार्थानां साक्षात्कारः निःश्रयसप्राप्तौ कारणं परन्तु न्यायसूत्रे तृतीयपदार्थरूपेणोल्लिखितः संशयोऽपि परम्परया कारणं भवतीति। प्रबन्धेऽस्मिन् संशयस्य कथं निःश्रेयसप्राप्तौ कारणत्वमिति प्रदर्शितम्।

मूलतः संशयः अनिश्चितज्ञानमिति। सम्-पूर्वकात् शीधातोः अच्प्रत्यययोगेन संशयशब्दः निष्पद्यते। महर्षिणा भगवता गौतमेन उक्तं ''समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः''[8] इति। लक्षणे उल्लिखितेन संशयशब्देन लक्ष्यनिर्देशः विमर्शशब्देन च सामान्यलक्षणं सूच्येते। विशेषापेक्षपदेन प्रतिबन्धकत्वे सति विशेषधर्मस्य स्मरणं सूच्यते। विमर्श इत्यत्र विशब्दस्य अर्थः विरोधः इति। मृश्धातोः अर्थः ज्ञानमिति। -अर्थात् एकस्मिन् धर्मिणि विरुद्धनानाधर्मस्य ज्ञानमेव संशय इति। श्रीशङ्करमिश्रेण उक्तम् -''एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशयः'' [9] इति। वैशेषिकाचार्येण कणादेनापि उक्तं -''सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः'' [10] इति। अर्थात् सामान्यस्य उपलब्धेः विशेषस्य चानुपलब्धेः ततः विशेषस्मरणाच्च संशयः भवति। यथा अयं स्थाणुः पुरुषो वा। अत्र परस्परविरूद्धधर्मरूपेण स्थाणुत्वं पुरुषत्वं वा परिलक्ष्यते। अत्र केवलं दीर्घतादिसामान्यधर्मदर्शनेन वल्कलादिविशेषधर्मस्मरणेन च संशयो जायते।

नव्यन्याये विरुद्धभावाभावचतुष्कोटिकः संशयः स्वीक्रियते। तेषां मते नञ्-शब्दस्य प्रयोगं विना कोटिद्वियस्य विरोधः स्पष्टरूपेण न प्रतीयते। अतः संशयबोधके वाक्ये नञ्-शब्दस्य प्रयोगः अतिप्रयोजनीयः इति। यथा अयं स्थाणुर्न पुरुषो न वेति। अत्र स्थाणुत्वं स्थाणुत्वाभावत्वञ्च पुरुषत्वं पुरुषत्वाभावत्वञ्चेति भावाभावसंशयः स्वीकृतः नव्यनैयायिकैः। भाषापरिच्छेदकारेण आचार्येण विश्वनाथेनापि उक्तं-

''स संशयो मतिर्या स्यादेकत्राभावभावयोः।
साधारणादिधर्मस्य ज्ञानं संशयकारणम्।।''[11]

अर्थात् एकस्मिन् धर्मिणि विरुद्धभावाभावप्रकारकं ज्ञानमेव संशयः। उभयोः भावाभावयोः पदार्थयोः साधारणादिधर्मस्य यत् ज्ञानं तदेव संशयकारणमिति। यथा नरो वा स्थाणुर्वा। अत्र वा शब्देन अभावः स्वीक्रियते। अतः अत्र न तु एकः संशयः अपि तु संशयद्वयमिति। तत्रैव सिद्धान्तमुक्तावलीकारेण उक्तम्-''एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः'' [12] इति तर्कसंग्रहकारेण अन्नंभट्टेनापि उक्तम् -''एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं संशयः''[13] इति। यथा स्थाणुर्वा पुरुषो वा। अत्र तर्कसंग्रहकारेण भावाभावेति नोक्त्वा विरुद्धनानाधर्मेति उक्तमिति।

अतः दृश्यते यत् प्राचीनन्याये उभयभावकोटिके संशये स्वीकृतेऽपि नव्यन्याये तु विरुद्धभावाभावचतुष्कोटिकः संशयः स्वीक्रियते। नव्यनैयायिकेषु विषयेऽस्मिन् कश्चित् मतविरोधी दृश्यते। नव्यनैयायिकेन गदाधरभट्टाचार्येण भावकोटिकसंशयोऽपि स्वीक्रियते। भाषापरिच्छेदकारेणापि स्वीकृते उदाहरणेऽपि काचित् असङ्गतिः दृश्यते। तेन उदाहरणरूपेण ज्ञाप्यते नरो वा स्थाणुर्वा इति। तेन वा शब्देन अभावो ज्ञाप्यते। यदि एवं स्वीक्रियते तर्हि 'पर्वतो वह्निमान् न वा' इत्यत्र नञ्-शब्दप्रयोगो व्यर्थो भवति। किन्तु उभयभावकोटिकसंशयः स्वीक्रियते चेत् एतादृशः कश्चित् प्रतिबन्धको न तिष्ठेत्। शास्त्रेषु बहुकोटिकसंशयस्य प्रयोगोऽपि दृश्यते -''स्वप्नो नु माया नु मतिभ्रमो नु क्लिष्टं नु तावत्फलमेव पुण्यम्''[14] इति।

अग्रेऽवस्थितेन पदार्थेन सह साधारणधर्मदर्शनादिलौकिककारणानां कालाद्यलौकिककारणानाञ्च सन्निधानेन संशयो जायते। नैयायिकैः संशयोत्पत्तेः पञ्च संख्यकानि कारणानि स्वीक्रियन्ते। यथा साधारणधर्मजन्यज्ञानम्, असाधारणधर्मजन्यज्ञानं, विप्रतिपत्तिजन्यज्ञानम्, उपलब्ध्यव्यवस्थाजन्यज्ञानम्, अनुपलब्ध्यव्यवस्थाजन्यज्ञानञ्चेति।

**साधारणधर्मजन्यज्ञानम्:** केवलं साधारणधर्मदर्शनेन यः संशयो जायते स साधारणधर्मजन्यसंशयः इति। अत्र साधारणधर्मदर्शने सति विशेषधर्मस्य अदर्शनं भवति। केवलं तस्य स्मरणं भवति। यथा अयं स्थाणुः पुरुषो वा। अत्र साधारणधर्मस्य दर्शनं भवति न तु विशेषधर्मस्य।

**असाधारणधर्मजन्यज्ञानम्:** न केवलं साधारणधर्मदर्शनेन अपि तु असाधारणधर्मदर्शनवशात् संशयो जायते। यथा शब्दत्वस्य असाधारणत्वनिर्णयादनन्तरं शब्दो नित्यो न वा इति संशयो जायते।

**विप्रतिपत्तिजन्यज्ञानम्:** यदा एकस्मिन् विषये एकस्मिन् एव समये विरुद्धधर्मद्वयस्य ज्ञानं जायते तदा तद् विप्रतिपत्तिजन्यज्ञानम् इति उच्यते। भाष्यकारेण उक्तं -''समानेऽधिकरणे व्याहतार्थौ प्रवादौ विप्रतिपत्तिशब्दस्यार्थः''[15] इति। यथा कैश्चन दार्शनिकैः उच्यते आत्मा अस्ति, कैश्चन तु उच्यते आत्मा नास्ति इत्यत्र विप्रतिपत्तिज्ञानजन्यसंशय इति।

**उपलब्ध्यव्यवस्थाजन्यज्ञानम्:** उपलब्धिर्नाम ज्ञानम्। क्वचित् उपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्य अनुपलब्धेः किं सदुपलभ्यते, अथ असदिति संशयो भवति। यथा तडागादिषु सदुदकमुपलभ्यते, मरीचिषु च अविद्यमानम् उदकमिति।

**अनुपलब्धव्यवस्थाजन्यज्ञानम्:** उपलब्धिवदनुपलब्धिरपि संशयस्य एकं कारणं भवतीति। यद्वस्तु अलीकं यच्च अनुपलब्धं भवति, तस्मिन् वस्तुविषये भवति संशयः। यथा आकाशकुसुममिति। संशयस्य कारणविषये नैयायिकेषु मतपार्थक्यं दृश्यते। तर्कभाषाकारेण केशवमिश्रेण कारणत्रयं स्वीकृते सति भाषापरिच्छेदकारेण विश्वनाथेन कारणद्वयं स्वीकृतम्। परन्तु महर्षिणा गौतमेन पञ्चविधकारणवशात् पञ्चविधसंशयः स्वीक्रियते।[16]

अनिश्चितज्ञानं भवति संशयः। व्यक्तेः दोलायमानज्ञानमेव संशय इति। इदं ज्ञानं दोलासदृशम् अनवस्थितमिति। जीवकल्याणार्थे साधारणतः विद्याचतुष्टयम् उपदिश्यते, तद्यथा त्रयी, वार्ता, दण्डनीतिः आन्वीक्षिकी चेति। तदुच्यते-

''त्रैविद्येभ्यस्त्रयीं विद्याद्दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः।।''[17]

उक्तस्य विद्याचतुष्टयस्य पृथक् प्रस्थानमस्ति। प्रस्थानशब्देन असाधारणत्वं प्रतिपाद्यते। संशयादयः पदार्थाः आन्वीक्षिक्याः पृथक् प्रस्थानाः। संशयादीनां पृथग् वचनं विना अध्यात्मविद्यामात्रमियम् आन्वीक्षिकी स्यात् यथोपनिषदः। किन्तु संशयादिपदार्थानां पृथगुल्लेखेन आन्वीक्षिकीविद्या उपनिषद्वद् अध्यात्मविद्यारूपेण न प्रतीयते।[18]

संशयो न्यायप्रवृत्तिमूलम्। यथा अज्ञातपदार्थे तथैव ज्ञातपदार्थे न्यायो न प्रवर्तते, केवलमात्रं सन्दिग्धपदार्थे एव न्यायः प्रवर्तते। ''नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते किं तर्हि? संशयितेऽर्थेइति। ''[19] संशयं विना अर्थावधारणं न भवति। कारणं संशयानन्तरमेव पक्षप्रतिपक्षाभ्याम् अर्थावधारणं निर्णयः भवतीति। ''विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः'' [20] इति। अर्थात् पक्षप्रतिपक्षाभ्यां संशयदूरीकरणेन एकमतसंस्थापनेन च तत्त्वं निर्णीयते। यद्यपि निर्णयः संशयपूर्व इति सर्वदा वक्तुं न शक्यते, कारणं प्रत्यक्षादिस्थले निर्णयात् प्राक् संशयो न दृश्यते। सर्वदा

[8] न्यायसूत्रम् 1/1/23
[9] वैशेषिकसूत्रम् 2/2/17
[10] वैशेषिकसूत्रम् 2/2/17
[11] कारिकावली ,130 श्लोक।
[12] न्यायसिद्धान्तमुक्तावली टीका।
[13] तर्कसंग्रहः।
[14] अभिज्ञानशाकुन्तलम् 6/10
[15] वात्स्यायनभाष्यम् 2/1/6
[16] तर्कभाषाश्री गङ्गाधर कर .सम्प., पृ .498
[17] मनुसंहिता 7/43
[18] वात्स्यायनभाष्यम् सू .1/1/1
[19] वात्स्यायनभाष्यम् सू .1/1/1
[20] न्यायसूत्रम् 1/1/41

निर्णयः संशयपूर्वो न भवति चेदपि विचारः अवश्यमेव संशयपूर्व इति।[21] अतः सर्वत्रैव संशयपूर्वकविचारो दृश्यते। शिष्टयोश्च वादिप्रतिवादिनोः शास्त्रे विमर्शपूर्वो विचार इति सिद्धम्। संशयानन्तरं पक्षप्रतिपक्षाभ्याम् एकमतसंस्थापनेन अर्थावधारणेन न्यायविद्यायाः दृष्टनिःश्रेयसरूपगौणप्रयोजनं सिद्ध्यते।

संशयो मोक्षरूपादृष्टनिःश्रेयसप्राप्तौ परम्परया सहायकोऽपि भवति। अनादिकालादारभ्य जीवाः मिथ्याज्ञानवशादेव संसारसागरे निमग्नाः भवन्ति। आत्मोपलब्ध्या मिथ्याज्ञानस्य निवृत्तिर्भवति। तेनैव परम्परया दोष-प्रवृत्ति-जन्म-दुःखानां निवृत्तिः भवति। यदुक्तं ''दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः''[22] इति। तत्र दुःखस्य आत्यन्तिकनिवृत्तिरेव मोक्ष इति। अतः आत्मज्ञानेनैव भवति मुक्तिरिति। किन्तु आत्मज्ञानस्यैव जिज्ञासा तावन्न भवति यावन्न तस्मिन् विषये संशयो भवति। गौतमोक्तसंशयादिपदार्थानां तत्त्वज्ञानं लभ्यते चेत् तेन बहुदृष्टनिःश्रेयस्य प्राप्तिर्भवति। तेन साहाय्येन श्रुतिबोधितात्मादिपदार्थस्य मननं सम्पाद्य मोक्षमन्दिररूपतृतीये सोपाने उपविश्य च आत्मादिप्रमेयपदार्थानां साक्षात्कारेणैव अदृष्टनिःश्रेयस्य प्राप्तिर्भवति। यच्च परमं प्रयोजनम्। तेनैव भवति मनुष्यः कृतकृत्यः। अतः साक्षाद्रूपेण न भूत्वापि परम्परया संशयोः निःश्रेयसप्राप्तौ सहायको भवतीति शम्।

**सन्दर्भ**


1. अन्नंभट्टः, तर्कसंग्रहः। सम्पा. श्रीनारायणचन्द्र गोस्वामी। कलिकाता, संस्कृत पुस्तक भण्डार, 1390 (बङ्गव्द) मुद्रणम्।
2. केशवमिश्रः, तर्कभाषा। सम्पा. श्रीगङ्गाधर कर। कलिकाता, महाबोधि बुक एजेन्सि, 1415 (बङ्गव्द) मुद्रणम्।
3. जयन्तभट्टः, न्यायमञ्जरी। सम्पा. अमितभट्टाचार्यः। कलकाता, संस्कृत बुक डिपो, 2006 मुद्रणम्।
4. तर्कवागीशः फणिभूषणः। न्यायपरिचयः। कलकाता, बङ्गीयसाहित्यपरिषद्, 1413 (बङ्गव्द) मुद्रणम्।
5. पं. जगदीश शास्त्री। उपनिषद्। मोतीलाल बनारसीदास, नवदेहली, 1998 मुद्रणम्।
6. प्रशस्तपादाचार्यः। प्रशस्तपादभाष्यम्। सम्पा. दुर्गाधरज्ञ शर्मा। वाराणसी, विद्यामन्दिर प्रेस प्राइभेट लिमिटेड, 1885 मुद्रणम्।
7. महर्षि गौतमः। न्यायदर्शनम्। सम्पा.फणिभूषणतर्कवागीशः। कलकाता, पश्चिमबङ्गराज्यपुस्तकपर्षन्, 2011 मुद्रणम्।
8. विश्वनाथन्यायपञ्चाननभट्टाचार्यः। भाषापरिच्छेदः। सम्पा. अनामिकारायचैधरी। कलकाता, संस्कृत पुस्तक भण्डार, 2013 मुद्रणम्।


[21] न्यायवार्त्तिकतात्पर्यटीका।

[22] न्यायसूत्रम् 1/1/2